## ।। शुक्रकवचम् ।।

मृणालकुन्देन्दुपयोजसुप्रभं पीतांबरं प्रसृतमक्षमालिनम् ।
समस्तशास्त्रार्थविधिं महांतं ध्यायेत्कविं वांछितमर्थसिद्धये ।।१।।
ॐ शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः ।
नेत्रे दैत्यगुरुः पातु श्रोत्रे मे चन्दनद्युतिः ।।२।।
पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः ।
वचनं चोशनाः पातु कंठं श्रीकंठभक्तिमान् ।।३।।
भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः ।
नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः ।।४।।
कटिं मे पातु विश्वत्मा ऊरू मे सुरपूजितः ।
जानुं जाडयहरः पातु जंघे ज्ञानवतां वरः ।।५।।
गुल्फौ गुणनिधिः पातु पातु पादौ वरांबरः ।
सर्वाण्यंगानि मे पातु स्वर्णमालापरिष्कृतः ।।६।।
य इदं कवचं दिव्यं पठति श्रद्धयान्वितः ।
न तस्य जायते पीडा भार्गवस्य प्रसादतः ।।७।।

इति श्रीब्रह्मांडपुराणे शुक्रकवचं संपूर्णम् ।